मम राज्यं वसु च त्वया विभक्तं मम स्त्विति शेषः पर्वं त्वदीयमपि मये ३२ ३५ बहुशोक्तसंधिरार्थः ३६ श्रेयस्करं धर्मयुक्तं धर्मन्यायमर्यादां ज्यायसे ... ३७

36

३

तपसे तपोर्थं धृतमानसः निश्चितांतःकरणः ५६ इति कृत्वा इति बुद्धिं कृत्वा अध्यवसायं तथा निश्चित्य च ५७ इति रा॰ उ॰ नवमः सर्गः ९
भ्रातरो रावणकुंभकर्णविभीषणाः १ तांस्तान्धर्मविधीन्धर्मानुष्ठानि २ संक्षेपेण कुंभपंचयति कुंभकर्ण इत्यादि वक्ष्यमिः सूर्यपंच

सत्यं ते प्रतिजानामि भ्रातस्तस्यापि कोपि वा भविष्यास्योजसा चैव संताप्यस्य न हन्तृतं ५५ ततः क्रोधे
न तेनैव दशग्रीवः सहानुजः चिकीर्षुर्दुष्करं कर्म तपसे धृतमानसः ५६ प्राप्स्यामि तपसा काममिति
कृत्वाध्यवस्य च आगच्छदात्मसिध्यर्थं गोकर्णस्याश्रमं शुभं ५७ स रावणः सहानुजस्तदा तपश्च
चार तं लमुग्रविक्रमः अतोषयच्चापि पितामहं विभुं ददौ स तुष्टश्च वरान्जयावहान् ५८ इत्यार्षे रा॰ उ॰
नवमः सर्गः ९ अथाब्रवीन्मुनिं रामः कथं ते भ्रातरो वने कीदृशं तु तदा ब्रह्मंस्तपस्तेपुर्महाबलाः अ
गस्त्यस्त्वब्रवीत्तत्र रामं सुप्रीतमानसं तांस्तान्धर्मविधींस्तत्र भ्रातरस्ते समाविशन् २ कुंभकर्णस्ततो
यत्तो नित्यं धर्मपथे स्थितः तताप ग्रीष्मकाले तु पंचाग्नीन्परितः स्थितः ३ मेघांबुसिक्तो वर्षासु वीरासनम
सेवत नित्यं च शिशिरे काले जलमध्यप्रतिश्रयः ४ एवं वर्षसहस्राणि दश तस्यापचक्रमुः धर्मे प्रयत
मानस्य सत्पथे निष्ठितस्य च ५

मे दिति पाठे सूर्यः पंच सोयेषां तैर्वाक्तिभिस्तथ ... र्थः पंचाग्नीन्परितः स्थित इति पाठेपि सूर्यपंचसहि
तापव पंचा ... ३ ... सो रूप ... द्दति ... जलांप्रतिष्ठाया स्थितिर्वीरासनं जलमध्यं प्रति श्रयः ... चासौ यस्य सः ४ ५ ६ ७

वा॰
उ॰
२१

सूर्यानुवर्ती ... ऊर्ध्वशिरोबाहुः स्थितः ... स्वर्गमगमत्‌ देवगणा नंदनवने ... दर्शितः ... कुम्भकर्ण ...

विभीषणस्तु धर्मात्मा नित्यं धर्मपरः शुचिः पंचवर्षसहस्राणि पादेकेन तस्थिवान्‌ ६ समाप्ते नियमे त
स्यानन्तरमप्सरोगणाः ननृतुश्च अवर्षंचितश्चुत्रुवुश्चापि देवताः ७ पंचवर्षसहस्राणि सूर्यं चैवान्ववर्तत
तस्थौचोर्धशिरोबाहुः स्वाध्यायेधृतमानसः ८ एवंविभीषणस्यापि स्वर्गस्थस्येवनंदने दशवर्षसहस्रा
णि गतानि नियतात्मनः ९ दशवर्षसहस्रं तु निराहारो दशाननः पूर्णेवर्षसहस्रेतु शिरश्चाग्नौ जुहाव सः १०
एवंवर्षसहस्राणि नव तस्यातिचक्रमुः शिरांसि नव चाप्यस्य प्रविष्टानि हुताशनं ११ अथ वर्षसहस्रे तु द
शमे दशमे शिरः छेत्तुकामे दशग्रीवे प्राप्तस्तत्र पितामहः १२ पितामहस्तु सुप्रीतः सार्धं देवैरुपस्थितः त
वतावद्दशग्रीवः प्रीतोस्मीत्यभ्यभाषत शीघ्रं वरय धर्मज्ञ वरो यस्तेभिकांक्षितः कं ते कामं करोम्यद्य न वृथा
ते परिश्रमः १४ अथाब्रवीद्दशग्रीवः प्रहृष्टेनान्तरात्मना प्रणम्य शिरसा देवं हर्षगद्गदया गिरा १५ भगवन्प्रा
णिनां नित्यं नान्यत्र मरणाद्भयं नास्ति मृत्युसमः शत्रुरमरत्वमहं वृणे १६ एवमुक्तस्तदा ब्रह्मा दशग्रीवमुवाच
ह नास्ति सर्वामरत्वं ते वरमन्यं वृणीष्व मे एवमुक्ते तदा राम ब्रह्मणा लोककर्तृणा दशग्रीव उवाचेदं कृताञ्जलिरग्र
तः १८ सुपर्णनागयक्षाणां दैत्यदानवरक्षसां अवध्योहं प्रजाध्यक्ष देवतानां च शाश्वत नहि चिंता ममान्येषु प्रा

38

वी:
३:
२४

२२ भूयोन्यः सुभो वरो दीयतेतच्छृणु २३ अमरत्वं च पितरास्मि इत्युक्तं तमेवाहं छेदतः इति
णं भविष्यति २४ २८ हे भगवन् लोकगुरुः उत्पत्तिस्त्वं पितामह तात अमरत्वं प्रीतः पते नैवाहं कृतकृत्योस्मि सर्वगुणैः पुरुषार्थैः मनसा यद्यद्येप्सितं रूपं तत्तच्छेदतस्तं मात्रे
एवमुक्तस्तु धर्मात्मा दशशीर्षेण रक्षसा उवाच वचनं देवः सह देवैः पितामहः २१ भविष्यत्येवमेतत्ते व
चो यत्त्वमुक्तं गव एवमुक्त्वा तु तं रामः दशग्रीवं पितामहः २३ श्रृणु चापि वरो भूयः प्रीतस्येह शुभोम
म कृतानि यानि शीर्षाणि पूर्वं मग्नौ त्वयानघ २३ पुनस्तानि भविष्यन्ति तथैव तव राक्षस (कृतानि
यानि शीर्षाणि पूर्वं मग्नौ) वितराम्यहं ते सौम्य वरं चान्यं दुरासदं छंदतस्तव रूपं च मनसा यद्यदेप्सितं प
एवं पितामहोक्तस्य दशग्रीवस्य रक्षसः अग्नौ कृतानि शीर्षाणि पुनस्तान्युत्थितानि वै एवमुक्त्वा तु तं रा
मदशग्रीवं पितामहः ३१ विभीषणं तथा वत्स धर्मे संहितबुद्धिना परितुष्टोस्मि धर्मात्मन् वरं वरय सुव्रत
विभीषणस्तु धर्मात्मा वचनं प्राह साञ्जलिः २८ वृतः सर्वगुणैर्नित्यं चन्द्रमा रश्मिभिर्यथा भगवन् कृतकृ
त्योहं यन्मे लोकगुरुः स्वयं २९ प्रीतेन यदि दातव्यो वरो मे शृणु सुव्रत परमापद्गतस्यापि धर्मे मम मतिर्भवेत्
प्रीते रे वं सर्वगुरुः पार्थसाधनता त ३ अथापि यदि सन्नेव तत्पाव शंकश्चिद्भेदानष्ठ तद्दातं वरं श्रेष्ठं परमापद्गतस्यापि सात्विकं वद राव
परमापद्गतस्यापि मम धर्मे न रावणो मतिर्भवेत् रामो विग्रहवान्धर्मः ३० उक्तरेव धर्म पदेन नाराय णः अन्न तासासमवतु ... तेन

वा॰ ३॰ २२

अशिशिलितं सं भूपदेशो विभाषी मर्थः ब्रह्मास्त्रब्रह्मविद्याप्रतद्दरणामशौच ब्रह्मविद्यासिद्धिं प्रति वंध कमिति ज्ञाय धेतत्ताभायतत्वेहं च्छी तदपाल
येयं ३१ परमोदारः परमोदारः ईदृशाः पवरस्य परमकातंतय मेवाह नहीति ३३ राक्षसयोनौ जातस्यापि यितापमेघ बुद्धिर्न जायते ततः प्रातिदे पम

अशिक्षितं च ब्रह्मास्त्रं भगवन्नीति भातु मे यायामे जायते बुद्धिर्यैर्युते धर्म मे पुरा मायामे व महर्षिणा तं
तं च मंच पालये ३१ एवमेव परमोदारः वरः परमकोमलः नीहिंसकैरभिरक्षानां लोके किंचन दुर्लभः ३२ ए
नः प्रजापतिः प्रीतो विभीषणमुवाच ह धर्मिष्ठत्वं यथा वत्स तथा चैतद्भविष्यति ३३ यस्माद्राक्षसयोनौ ते
जातस्यामित्रनाशन नाधर्मे जायते बुद्धिरमरत्वं ददामि ते इत्युक्त्वा कुंभकर्णाय वरं दातुमवस्थितं प्रजाप
तिं सुराः सर्वे वाक्यं प्रांजलयोऽब्रुवन् ३४ न तावत्कुंभकर्णाय प्रदातव्यो वरस्त्वया जानीषे हि यथा लोकां
स्त्रासयत्येष दुर्मतिः ३५ नंदनेऽप्सरसः सप्त महेंद्रानुचरा दश अनेन भक्षिता ब्रह्मन् ऋषयो मानुषास्तथा ३६
अलब्धवरपूर्वेण यत्कृतं राक्षसेन तु यद्येष वरलब्धः स्याद्भक्षयेद्भुवनत्रयं ३७ वरव्याजेन मोहोऽस्मै दीय
तामभितप्रभ लोकानां स्वस्ति चैवं स्याद्भवेदस्य च संमतिः ३८

एवं ददामि प्रवर प्रार्थितममरत्वं ब्रह्मणः सकाशा
दुर्मवलाल्लब्धं विभीषणेनेति निष्कामतया देवोपासनं सर्वार्थसाधनमिति बोध्यं ३४ ३५ एष दुर्मतिरिति त्रीन् लोकान् त्रासयतीत्यन्वीषे ३६
तदेव दर्शयति नंदनेति ३७ ३८ मोहोऽस्मानं एवं मोहदानेनैव लोकानां स्वस्ति स्यात् अस्य संमतिः समाननं च स्यात् ३९ ॥ २२

५०

वा॰ सं॰ गरुडानां पतिः [illegible] शानेन गरुडे [illegible] कश्च येतावणे मार्कंडेयपुराणे कसाक्षिद्वाजो [illegible] वर्षशानां [illegible] कृष्णे दमम्न [illegible] केन गरुडे पति

उ॰ आप्य यमने [illegible] तरेति पुराणप [illegible] कृष्णा ३८ ३९ मालिनागरुडेन मालिना उन्नत्य पुरा स्कंधे गरुडेन देवे परं [illegible] स्मन्वयः ४० हरिद्

४

गरुडस्य गरुडेशाममीशानमिव चांतकः ललाटदेशे भास्वद्भिर्घोरैर्ददे यथाचले ३८ गरुडस्याभिहतस्ते

न मालिना गरुडो भृशं रणाग्रमरासृग्वदे कृतवान्वेदनातुरः ३९ यत्तद्विष्णुस्ते दैवे मालिना गरुडेन वै

उद्यतिष्ठन्महाबाहो रक्तमथ प्रपि नर्दता ४० रक्तसारवती [illegible] हरिर्यथानुजः तिर्यगास्थाय संक्रुद्धः

पक्षीशो भगवान्हरिः ४१ एवमुक्त्वोत्ससर्ज मालेश्चक्रं जिघांसया तत्सूर्यमंडलाभासं स्वभासा भासयन्

नभः ४२ कालचक्रनिभं चक्रं मालेः शीर्षमपातयत् तच्छिरो राक्षसेंद्रस्य चक्रोत्कृत्तं विभीषणं ४३ प

पात रुधिरोद्गारि पुरा राहुशिरो यथा ततः सुरैः संप्रहृष्टैः सर्वप्राणसमीरितः सिंहनादरवो मुक्तः सा

धु देवेति वादिभिः ४४ मालिनं निहतं दृष्ट्वा सुमाली माल्यवानपि सबलौ शोकसंतप्तौ लंकामेव

प्रधावितौ ४५ गरुडस्तु समाश्वस्तः संनिवृत्य यथापुरा राक्षसान्द्रावयामास पक्षवातेन कोपितः ४६

रणनत्रः तिर्यगिति विमुखे पक्षीशे तिर्यग्वलितग्रीवमास्थाय स्थित्वा ४१ मालेर्जिघांसया चक्रमुत्ससर्ज कालचक्रनिभं दिनमासा

दिरूपेण परिवर्तमानकालचक्रसदृशं तेनाप्रतिघातत्वमुक्तं ४२ ४३ सर्वप्राणसमीरितः सर्ववलेन प्रवर्तितः ४४ ४६ श्री

श्रीरामायैवनमोनमः ॥ ९६

व
उ

२६ ३० लंबाभरणं लंबमानमाभरणं उत्क्षिप्य विमुच्य द्विपः करमिव शुंडादंडमिव २९ यंतुशिरश्छेदे नतत्स्यास्थानष्टसारथित्वादनवस्थित

सततं छादयामास निहारमिव भास्करः राक्षसाः सत्वसंपन्नाः पुनर्धैर्यं समादधुः २६ अथ सोभ्यपत
द्रोषाद्राक्षसो बलदर्पितः महानादं प्रकुर्वाणो राक्षसान्जीवयन्निव २७ उत्क्षिप्य लंबाभरणं धुन्वन्क
रमिव द्विपः ररास रक्षसो हर्षात्सतडित्तोयदो यथा २८ सुमालेर्नर्दतस्तस्य शिरो ज्वलितकुंडलं चिच्छे
द यंतुरश्वाश्च भ्रांतास्तस्य तु रक्षसः २९ तैरश्वैर्भ्राम्यते भ्रांतैः सुमाली राक्षसेश्वरः इंद्रियाश्वैः परिभ्रांतै
र्धृतिहीनो यथा नरः ३० ततो विष्णुं महाबाहुं प्रपतंतं रणाजिरे हृते सुमालेरश्वैश्च रथे विष्णुरथं प्रति ३१
माली चाभ्यद्रवद्युक्तः प्रगृह्य सशरासनं मालेर्धनुश्च्युता बाणाः कार्तस्वरविभूषिताः विविशुर्हरिमा
साद्य क्रौंचं पत्ररथा इव अर्द्यमानः शरैः सोथ मालिमुक्तैः सहस्रशः चुक्षुभे न रणे विष्णुर्जितेंद्रिय इवाधि
भिः अथ मौर्वीस्वनं कृत्वा भगवान्भूतभावनः मालिनं प्रति बाणौघान्ससर्जासिगदाधरः ३४ ते मा
लिदेहमासाद्य वज्रविद्युत्प्रभाः शराः पिबंति रुधिरं तस्य नागा इव सुधारसं ३५ मालिनं विमुखं कृत्वा शंख
चक्रगदाधरः मालिमौलिं ध्वजं चापं वाजिनश्चाप्यपातयत् ३६ विरथस्तु गदां गृह्य माली नक्तंचरोत्त
मः आपुप्लुवे गदापाणिर्गिर्यग्रादिव केसरी ३७

गतिकाश्चासंनिवेषः २९ भ्राम्यति भ्रांतैस्स ३० सुमालेः रथेश्वैः हृतैरतस्त
तोपकृष्य मालिस ... रथाद्वस्त्रत्वा ... रथप्रतिपत्तुः प्रगृह्य मुक्तोभ्यद्रवत् ३१ क्रौंच क्रौंचादि पत्ररथाः पक्षिणः ३२ ... नागा ... ३५ मौलिः

वा॰ रा॰ उ॰ ४

वनानि स्तनित्नवः गैरिकधाराः गैरिकप्रस्रवणिस्यात् १७ रवांश्चापि अपि नामाणि [illegible] बोविमूर्वोदिताः १८ पितोयस्तान् [illegible] प्रतान्
कंपितान् १७ १८ विनिर्मुक्ताः [illegible] मुक्ताः शराश्चासनिनिहरयग्योजं अथनारायणोरितानारायणत्याणस्मरषवे निर्धावंतिमह

ब्रह्मानिपणाद्भ्योविसृजकृतानिदि असकृत्तरंतिमुराभिः सुग्राणाधरवाचलः १७ शाखराजरवश्चापि
शार्ङ्गचापवरलस्या राक्षसानारवाश्चापि ग्रसतेदेत्यवारणः मूर्ति दिवकराचोरावायचारवसागरात् प
र्वतादिवनागेंद्राधाराधाराचक्षचोद्धतान् १८ तथाशार्ङ्गविनिर्मुक्ताः शरानारायणोरितान् निर्धावंतीषवस्त
त्र्णशतशोऽथसहस्रशः १९ शरभेणयथासिंहाः सिंहेनद्विरदोयथा द्विरदेनयथाव्याघ्रा व्याघ्रेणद्वीपि
नोयथा २० द्वीपिनेवयथाश्वानः श्वुनामार्जारकायथा मार्जारेणयथासर्पाः सर्पेणचयथाखवः २१ तथा
तेराक्षसाः सर्वेविष्णुनाप्रभविष्णुना द्रवंतिद्राविताश्चान्येशायिताश्चमहीतले २२ राक्षसानांसहस्राणि
निहत्यमधुसूदनः वारिजंपूरयामासतोयदंसुरराडिव नारायणशरत्रस्तंशंखनादसुविक्लवं ययौलंका
मभिमुखंप्रभग्नंराक्षसंबलं २४ प्रभग्नेराक्षसबलेनारायणशराहते सुमालीशरवर्षेणनिववाररणे हरिं
१९ तेषांशिरोधरान्धरान्छरध्वजान्धनूंषिच रथान्पताकास्तूणीरान्विच्छेदसहरिः शरैः ७ ३ र २

स्रशः शतशः १९ २० द्वीपीतरक्षुव्याघ्राः आखवोमूषकाः २१ महीतलेशायिताः अनुद्रुत्येतिशेषः २२ २३ राक्षसरक्षः संबंधि २४ निववारवारयामास २५

ॐ ४

वा०
उ०
१४

वज्रानिलमनोजवः वज्रसाराश्चानिलमनोजवाश्च जवो वेगो येषां ते विपर्यये प्रलयकाले लोका यथा यथार्थं विविशुरिति तद्वत् ४ स्यंदनादिभिः सह अश्वैरपि

तथा रक्षोधनुर्मुक्ता वज्रानिलमनोजवाः हरिं विविशुरतिस्म शरा लोका इव विपर्यये ४ स्यंदनैः स्यंदनगताः
गजैश्च गजमूर्धगाः अश्वारोहास्तथाश्वैश्च पादाताश्च पदे स्थिताः ५ राक्षसेन्द्रा गिरिनिभाः शरैः शक्त्यृष्टि
तोमरैः निरुच्छ्वासं हरिं चक्रुः प्राणायामाद्द्विजं यथा ६ निशाचरैस्ताड्यमानो मीनैरिव महोदधिः शार्ङ्ग
मायम्य दुर्धर्षो राक्षसेभ्योऽसृजच्छरान् ७ शरैः पूर्णायतोत्सृष्टैर्वज्रकल्पैर्मनोजवैः चिच्छेद विष्णुर्निशि
तैः शतैः शतशोऽथ सहस्रशः विद्राव्य शरवर्षेण वर्षं वायुरिवोत्थितं पांचजन्यं महाशंखं प्रदध्मौ पुरुषोत्तमः
सोऽंबुजो हरिणा ध्मातः सर्वप्राणेन शंखराट् ररास भीमं निर्ह्रादं त्रैलोक्यं व्यथयन्निव ९ शंखराजरवः
सोऽथ त्रासयामास राक्षसान् मृगराज इवारण्ये समदानिव कुंजरान् १० न शेकुरश्वाः संस्थातुं विमदाः कुं
जराभवन् स्यंदनेभ्यश्च्युता वीराः शंखरावितदुर्बलाः ११ शार्ङ्गचापविनिर्मुक्ता वज्रतुल्याननाः शराः
विदार्य तानि रक्षांसि सुपुंखा विविशुः क्षितिं १२ भिद्यमानाः शरैः संख्ये नारायणकरच्युतैः निपेतू
राक्षसा भूमौ शैला वज्रहता इव १३

ताडिताः ५ हरिं निरुच्छ्वासं चक्रुः ६ पूर्णायतोत्सृष्टैः वज्रकल्पैः वज्रवद्दृढैः ८ ९ अंबुजः शंखः सर्वप्राणेन सर्वबलेन शंखराडिति
विशेषणं ध्मातः वादितः १० ११ स्यंदनभ्रमवन् शंखरावितेन शंखशब्देन दुर्बलाः क्षीणबलाः स्वार्थे णिः १२ १३

श्रीवित्सत्वं वक्षवंदनभूते ६५ ६८ सुपर्णपक्षानिलेननुन्नपतत्तोमितवलं चलोपमं चलाउपलायमानत्व ६९ प्रियदस्याकाः ७० इतिश्री·उ·षष्ठः सर्गः ६

श्रीमान्श्रीवत्सवक्षश्च विमलेकमलेक्षणः शंखचक्रगदाशार्ङ्ग-खड्गश्रेष्ठवरायुधान् ६५ सुपर्णगिरिसं
काशं वैनतेयमथास्थितः राक्षसानामभावाय ययौ तूर्णतरं प्रभुः ६६ सुपर्णपृष्ठे स बभौ श्यामः पीतांबरो
हरिः कांचनस्य गिरेः शृंगे सतडित्तोयदो यथा ६७ सिद्धदेवर्षिमहोरगैश्च गंधर्वयक्षैरुपगीयमानः
समाससादामरशत्रुसैन्यं चक्रासिशार्ङ्गायुधशंखपाणिः ६८ सुपर्णपक्षानिलनुन्नपक्षं भ्रमत्पताकं
प्रविकीर्णशस्त्रं चचाल तद्राक्षसराजसैन्यं चलोपलं नीलमिवाचलाग्रं ६९ ततः शितैः शोणितमांस
रूषितैर्युगांतवैश्वानरतुल्यविग्रहैः निशाचरैः संपरिवार्य माधवं वरायुधैर्निर्बिभिदुः सहस्रशः ७ इत्या
र्षे रा·उ·षष्ठः सर्गः ६ नारायणगिरिं ते तु गर्जंतो राक्षसांबुदाः अर्दयंतोस्त्रवर्षेण वर्षेणेवाद्रिमंबुदाः १
श्यामावदातस्तैर्विष्णुर्नीलैर्नक्तंचरोत्तमैः वृतोंजनगिरीवायं वर्षमाणैः पयोधरैः २ शलभा इव केदारं
मशका इव पावकं यथामृतघटं दंशाः मकरा इव चार्णवं ३

अथ राक्षसोपरुद्धेन हरिणा तद्विद्रावणं नारायणगिरिमिति रूपकमिदं १ श्यामः सन्नवदातो निर्मलः अंजनगिरिवेति विभक्तिलोप आर्षस्त
तःसंधिः २ अमृतघटं तोद्रघटं दंशा वनमक्षिका इत्यर्थः ३

45

कालात्तमा कालप्रेरिता भौमादयाउत्पाताः ५२ ५४ स्वननादेन मेघस्वनेन समः स्वनो येषांते विमुंचंतः त्वस्य जाता अतिशोषः एवं वा संयद्रत्वस्यापि ५५

भौमाश्चैवांतरिक्षाश्च कालात्ताभा भयावहाः उत्पाता राक्षसेंद्राणां अभावाय समुत्थिताः ५२ अस्थीनि मे
घा ववृषुरुष्णं शोणितमेव च वेलां समुद्राश्चोत्क्रांताश्चेलुश्चाप्यथ भूधराः ५४ अट्टहासान्विमुंचंतो घनना
दसमस्वनाः वाश्यंतश्च शिवास्तत्र दारुणं घोरदर्शनाः ५५ संपतंत्यथ भूतानि दृश्यंते च यथाक्रमं गृध्रच
क्रं महच्चात्र प्रज्वालोद्गारिभिर्मुखैः रक्षोगणस्योपरिष्टात्परिभ्रमति कालवित् कपोता रक्तपादाश्च सारि
का विद्रुता ययुः ५० काका वाश्यंति तत्रैव बिडाला वै द्विपादिकाः उत्पातांस्ताननादृत्य राक्षसा बलगर्विताः ५८
यांत्येव न निवर्तंते मृत्युपाशावपाशिताः माल्यवांश्च सुमाली च माली च सुमहाबलाः ५९ पुरः सरा राक्षसानां
ज्वलिता इव पावकाः माल्यवंतं तु ते सर्वे माल्यवंतमिवाचलं ६० निशाचरा आश्रयंति धातारमिव देवताः
तद्बलं राक्षसेंद्राणां महाभ्रघननादितं ६१ जयेप्सया देवलोकं ययौ माल्यवशे स्थितं राक्षसानां समुद्यो
गं तं तु नारायणः प्रभुः ६२ देवदूतादुपश्रुत्य चक्रे युद्धे तदा मनः स सज्जायुधतूणीरो वैनतेयोपरि स्थि
तः ६३ आसाद्य कवचं दिव्यं सहस्रार्कसमद्युतिः आबध्य शरसंपूर्णे इषुधी विमले तदा ६४

गृध्रचक्रं गृध्रसमूहः ५६ ५८ मृत्युपाशैरुपाशिताः संजातबंधनाः ५९ माल्यवंतमचलं माल्यवराख्यं कुलपर्वतं ६० महाभ्रघननादितं महा
मेघसमूहवन्नादितं संजातनादं ६१

46

वा॰ ३०

विष्णोर्द्वेषस्य कारणं नास्ति अस्माभिस्तदपराधाकरणादिति भावः । विष्णोर्दोषस्य नास्त्येव कारणं [illegible] इति पाठे विष्णो रक्षसा द्वेषप्र[illegible]यः का-
रणं स्यात्तत्राह दोषो विष्णोः सद[illegible] दोषो नास्तीत्यर्थः । कथं तर्हीदानीमस्मासु द्वेषोऽत आह देवानामिति दोषेणोपजायेत ॥ ४२ ॥ जिघांसामः स्म

विष्णोर्द्वेषस्य नास्त्येव कारणं राक्षसेश्वर । देवानामेव दोषेण विष्णोः प्रज्वलितं मनः ॥ ४२ ॥ तस्मादद्यैव सहि-
ताः सर्वेऽन्योन्यसमावृताः । देवानेव जिघांसामो येभ्यो दोषः समुत्थितः ॥ ४३ ॥ एवं संमंत्र्य बलिनः सर्वे सैन्य-
मुपासिनाः । उद्योगं घोषयित्वा तु सर्वे नैर्ऋतपुंगवाः । युद्धाय निर्ययुः क्रुद्धा जंभवृत्रादयो यथा ॥ इति ते रा-
म संमंत्र्य सर्वोद्योगेन राक्षसाः । युद्धाय निर्ययुः सर्वे महाकाया महाबलाः । स्यंदनैर्वारणैश्चैव हयैश्च करिस-
न्निभैः ॥ ४७ ॥ खरैर्गोभिरथोष्ट्रैश्च शिशुमारैर्भुजंगमैः । मकरैः कच्छपैर्मीनैर्विहंगैर्गरुडोपमैः ॥ ४८ ॥ सिंहैर्व्याघ्रै-
र्वराहैश्च सृमरैश्चमरैरपि । त्यक्त्वा लंकां गताः सर्वे राक्षसा बलगर्विताः ॥ ४९ ॥ प्रयाता देवलोकाय योद्धुं दैवतशात्र-
वः । लंकाविपर्ययं दृष्ट्वा यानि लंकालयान्यथ ॥ ५० ॥ भूतानि भयदर्शीनि विमनस्कानि सर्वशः । रथोत्तमैरुह्य-
मानाः शतशोऽथ सहस्रशः ॥ ५१ ॥ प्रयाता राक्षसास्तूर्णं देवलोकं प्रयत्नतः । रक्षसामेव मार्गेण दैवतान्यपचक्र-

र्थे सनाथः हन्मः इत्यर्थः ॥ ४४ ॥ ४७ खरादयो वाहनानि ॥ ४८ ॥ सृमरो गवयः सृमरचमरयोर्नीलश्वेतपुच्छयोगाद्भेद इति तीर्थः ॥ ४९ ॥ लंकाविपर्ययं लं- उ
कानाशं लंकालयानि भूतानि तत्रत्यानि दैवतानि विमनस्कान्यासन् ॥ ५० ॥ ५१ ॥ रक्षसामेव मार्गेणानुयात्रया सह देवा अपचक्रमुरपगताः ॥ ५२ ॥

47

३३ चिंतादं दर्शयति हिरण्यपत्यादि ३४ ३५ अपराजिता इति छेदः ३६ ३७ अश्विनाविव वासवमिति भगाः शक्तयति पाठे भगास्तदं शौर्य मातानिवे

देवानांभयभीतानांहरिणारात्तमर्षभौ प्रतिज्ञातोवधोस्माकंचिंत्यतांयदिहक्षमं ३३ हिरण्यकशि
पोर्मृत्युरन्येषांचसुरद्विषां नमुचिःकालनेमिश्चसंह्लादोवीरसत्तमः ३४ राधेयोवक्रुमायीचलोकपालो
थधार्मिकः यमलार्जुनौचहार्दिक्यःशुंभश्चैवनिशुंभकः असुरादानवाश्चैवसत्यवंतोमहाबलाः स
र्वेसमरमासाद्यनश्रूयंतेपराजिताः ३५ सर्वैःक्रतुशतैरिष्टंसर्वेमायाविदस्तथा सर्वेसर्वास्त्रकुशलाः
सर्वेशत्रुभयंकराः ३६ नारायणेननिहताःशतशोथसहस्रशः एतत्तुज्ञात्वातुसर्वेषांक्षमंकर्तुमिहार्हथ ३७
दुःखंनारायणंजेतुंयेनोहंतुमिहेच्छति ३८ ततःसुमालिमालीचश्रुत्वामाल्यवतोवचः ऊचतुर्भ्रातरंज्ये
ष्ठमश्विनाविववासवं ३९ स्वाधीतंदत्तमिष्टंचऐश्वर्यंपरिपालितं आयुर्निरामयंप्राप्तंसुधर्मःस्थापितः
पथि ४० देवसागरमक्षोभ्यंशस्त्रैःसमवगाह्यच जिताद्विषोह्यप्रतिमास्तन्नोमृत्युकृतंभयं ४१
नारायणश्चरुद्रश्चशक्रश्चापियमस्तथा अस्माकंप्रमुखेस्थातुंसर्वेबिभ्यतिसर्वदा ४२

स्वधर्मः ३९ निरामयंनिरोगं सुधर्मःशोभनोधर्मः पथिस्थापितः प्राक्सम्यगनुष्ठितैरध्ययनादिभिर्यतोद्विषोदेवाजिताः ततस्माकंमृत्युकृ
तंभयंनास्तीत्यर्थः कर्तव्यंविशेषाभावान्[illegible]तितिरिति[illegible]वः ४० ४१ ४२
श्रीरामचन्द्रायनमोनमः॥गुणाश्चनमः॥

वा· ३· ४२

अतिक्रांतमर्यादान मर्यादाया व्यवस्था २१ २२ नौ भ्रातरौ मालिमालिनौ २३ पर्यायांतरे दूतः २४ पदेपदे प्रतिक्षणं २४ प्रजा

ज्ञानं हं समतिक्रांतमर्यादानात्मसाधमान् निह निष्यामि संक्रुद्धः सेरां भवत विज्वराः २१ इत्युक्तास्ते
सुराः सर्वे विष्णुना प्रभविष्णुना यथावासं ययुर्हृष्टाः प्रशंसंतो जनार्दनं २२ विबुधानां समुद्योगं माल्यवां
स्तु निशाचरः श्रुत्वा तौ भ्रातरौ वीरौ राविदं वचनमब्रवीत् २३ अमराः ऋषयश्चैव संगम्य किल शंकरं अ
स्मद्धं परीप्संत इदं वचनमब्रुवन् सुकेशितनया देव वरदानबलोद्धताः बाधंते स्मान्समुद्धमाघो
रूपाः पदेपदे २४ राक्षसैरभिभूताः स्म न शक्ताः स्म प्रजापते स्वेषु सद्मसु संस्थातुं भयात्तेषां दुरात्मनां
तदस्माकं हितार्थाय जहि तांस्त्रिविलोचन राक्षसान् हुंकृतेनैव दह प्रदह नो वर २७ इत्येवं त्रिदशैरुक्तो
निशम्यांधकसूदनः शिरः कंपं च धुन्वान इदं वचनमब्रवीत् २८ अवध्या मम ते देवाः सुकेशितनया र
णे मंत्रं तु वः प्रदास्यामि यस्तान्वै निह निष्यति २९ योऽसौ चक्रगदापाणिः पीतवासा जनार्दनः हरिर्ना
रायणः श्रीमान् शरणं तं प्रपद्यथ ३० हरादवाप्य ते मंत्रं कामारिमभिवाद्य च नारायणालयं प्राप्य त
स्मै सर्वं न्यवेदयत् ३१ ततो नारायणेनोक्ता देवा इंद्रपुरोगमाः सुरारींस्तान् निह निष्यामि सुरा भवत निर्भ

पते इति यहृद्दारा प्रजारक्षक। २५ २६ २७ शिरःकंपं धुन्वानः विषादतोपीति ज्ञापनेन स्वयानहीश्वराशयेनेति भावः २८ तदेवाह अवध्या इति २९

स्वकेशं प्रतिसर्पितः स्वकेशस्य स्त्री गौरी जीवितत्वात् मांगल्यवदारी नांतत्संगत्वकर्तृकतं संहारस्यानोचितं मत्वा न दत्त्यर्थः

इत्युक्तस्तु सुरैः सर्वैः कपर्दी नीललोहितः स्वकेशं प्रतिस्थापेतः प्राह देवगणान्विभुः १ मया वध्याः उक्तदैत्या
निष्यामि मम वध्या इति सुराः किमु मंत्रं प्रदास्यामि यो वै तान्निहनिष्यति २ एतमेव समुद्योगं प्रश्नहं तान्वद
हर्षयः गच्छध्वं शरणं विष्णुं हनिष्यति सनातनः प्रभुः ३ ततस्तु जयशब्देन प्रणम्य नं शुभं महेश्वरं विष्णोः समीप
माजग्मुर्निशाचरभयार्दिताः ४ शंखचक्रधरं देवं प्रणम्य बहुमान्य च ऊचुः संभ्रांतवदनाः स्वकेशात
नयान्नति स्वकेशतनयैर्देवविभिसततामिसनिभैः आक्रम्य वरदानेन स्थानान्यपहृतानि नः ५ त्वं
यज्ञहितान्मधुसूदन शरणं त्वां वयं प्राप्ता गतिर्भव सुरेश्वर ६ चक्रकृतासि कमलानि वेदयं नाय वै
भवत्त्रभयदोऽस्माकं नान्योऽस्ति भवता विना ७ रात्रस्तान्समरे हत्वा तान्सानुबंधान्मरोद्धतान् नुदनं नो भयं
देवनीहारमिव भास्करः ८ इत्येवं दैवतैरुक्तो देवदेवो जनार्दनः अभयं भयदोऽरीणां दत्वा देवानुवा
चह ९ स्वकेशं शात संजाने ईशानवरदर्पिते तांश्चाप्सतनयान् जाने येषां ज्येष्ठः सुमाल्यवान् १०

...वनमहीः मंत्रस्तुपायं १ एतमेवसमुद्योगं न तत्कालांतरीयमित्यर्थः ११ १२ संभ्रांतवतमं...नाईं स्वकेशतनयस्य अतिनाञ्च इत्यत्यर्थः १२
सानुबंधान्सानुचरान् तान्सास्त्रदीति शेषः नुमपंचनुद २१

अथ प्रशमंकरास्त्वर्थः खलु अथ इति ३ पंचमः सर्गः ५

वा· ...णवयेतेषां प्रहृतिः तैर्वध्यमाना इति १ २ ३ अथ कल्पवरादिपीडितदेवगाः स्वर्दितुं नामयदानं श्रुत्वा नारायणप्रेरक

३· ततस्ते ते रात्तसप्तवर्गवाह्यो निशाचरैः पत्रन्यातैर्युसेहनाः सुरान्महेंद्रान्ऋषिनागयक्षान्ववाधिरेतान्व

॥ रुवीर्यदर्पिताः अथ जगद्भ्रमन्तोनिलतुरासदाः सुप्रतिमानतेजसः वरप्रदानादपिगर्विताभृ

शंक्रतुक्रियाणां प्रशमंकराः सदा अथ इन्द्रवंशा ३ पंचमः सर्गः ५ तैर्वध्यमानादेवाश्च समस्तास्त्र

तपोधनाः भवान्तिः शरणं जग्मुर्देवदेवं महेश्वरं १ जगत्सृष्टिं तकर्तारमजमव्यक्तरूपिणं आधारं ८

सर्वलोकानांमाराध्यंपरमंगुरुं तेसमेत्यतुकामारिं त्रिपुरारिं त्रिलोचनं ऊचुः प्रांजलयोदेवाभयगा

द्गदभाषिणः ३ सुकेशपुत्रैर्भगवान्पितामहवरोद्धतैः प्रजाध्यक्षप्रजाः सर्वा वाध्यंतेरिपुवाधनैः ४

शरण्यान्यशरण्यानि आश्रमाणिकृतानिलः स्वर्गाच्च देवान्प्रच्याव्य स्वर्गेक्रीडंतिदेववत् ५ अहंविष्णु

रहंरुद्रोब्रह्माहंदेवराडहं अहं यमश्च वरुणश्चंद्रोहंरविरप्यहं ६ इतिमालीसुमालीचमाल्यवांश्चैव

राक्षसः वाधंते समरोद्धर्षा ये च तेषां पुरःसराः ७ तन्नोदेवभयार्तानामभयं दातुमर्हसि अशिवंवपुरास्था

नंवाधस्तैहेतुभिरित्यर्थः ४ शरण्यानि शरण्यार्हाणि देवपितृनिथिपशुपक्ष्यादिरक्षणार्हाणि देवान् च्याव्य स्वर्गे देववत् क्रीडति ५ ६ समरेसं

ग्रामेदुर्धर्षाउत्साहोयेषां ते ७ अशिवमसौम्यं रौद्रमिति यावत् रुद्रो वा पुरुष यदस्तितस्मै तेन नजुचौरान्याशिवान्पतिश्रुतेः ८ ॐ ॥

३२ मात्रा दत्ताः मात्रा नर्मदये च्छया दत्ता इत्यर्थः भगवदैवतं नक्षत्रमुत्तराफाल्गुनी ३३ ४० यक्षीमध्ये स्वरूपतातीयक्षीवरा यक्षीश्रेष्ठा इयो
पमीयते सा यक्षीवरोपमा ४१ ४२ मालेयाः इत्यत्राभिजन इति ठक् ४३ ॥

कन्यास्ताः प्रददौ हृष्टाः पूर्णचंद्रनिभाननाः त्रयाणां राक्षसेंद्राणां तिस्रो गंधर्वकन्यकाः ३२
दत्ताः मात्रा महाभागा नक्षत्रे भगदैवते कृतदारास्तु ते राम सुकेशतनयास्तदा चिक्रीडुः सह भार्या
भिरप्सरोभिरिवामराः ततो माल्यवतो भार्या सुंदरी नाम सुंदरी ३४ स तस्यां जनयामास यदपत्यं
निबोध तत् वज्रमुष्टिर्विरूपाक्षो दुर्मुखश्चैव राक्षसः सप्तघ्नोनोपि भार्यासीत्पूर्णचंद्रनिभानना ना
म्ना केतुमती नाम प्राणेभ्योपि गरीयसी ३७ सुमाली जनयामास यदपत्यं निशाचरः केतुमत्यामे
मामहाराज तन्निबोधानुपूर्वशः ३८ प्रहस्तोकंपनश्चैव विकटः कालिकामुखः धूम्राक्षश्चैव दंड
श्च सुपार्श्वश्च महाबलः ३९ संह्रादिः प्रघसश्चैव भासकर्णश्च राक्षसः राका पुष्पोत्कटा चैव कैकसी
च शुचिस्मिता कुंभीनसी च इत्येते सुमालेः प्रसवाः स्मृताः ४० मालेस्तु वसुदा नाम गंधर्वी रूपशा
लिनी भार्यासीत्पद्मपत्राक्षी स्वक्षी यक्षीवरोपमा ४१ सुमालेरनुजस्तस्यां जनयामास यत्प्रभो अपत्यं
कथ्यमानं मया त्वं शृणु राघव अनलश्चानिलश्चैव हरः संपातिरेव च एते विभीषणामात्या मालेय
स्तु निशाचराः ४२

१९ २२ द्वितीयस्तासह शरत्पर्यः मध्यमेशिखरऽतिसंवेष्ट २३ शकुनैरपिदुष्प्रापेरन्यत्रहेतटंकच्छिन्नचतुर्दिशि २४ अमरावतीसमासाद्येति

वा
उ०

त्वसाकमपितावत्वंगृहंकुरुमहामते हिमवंतमुपाश्रित्यमेरुमंदरमेववा २० महेश्वरगृहप्रख्यंगृहं
नःक्रियतांमहत् विश्वकर्मातत्स्तेषांराक्षसानांमहाभुजः २१ निवासंकथयामासशक्रस्येवामराव
तीं दक्षिणस्योदधेस्तीरेत्रिकूटोनामपर्वतः २२ सुवेलइतिमाप्यन्योद्वितीयोराक्षसेश्वराः शिखरेत
स्यशैलस्यमध्यमेंबुदसन्निभे २३ शकुनैरपिदुष्प्रापेटंकच्छिन्नचतुर्दिशि त्रिंशद्योजनविस्तीर्णाश
तयोजनमायता २४ स्वर्णप्राकारसंवीताहेमतोरणसंवृता मयालंकेतिनगरीशक्राज्ञयेननिर्मिता २५
तस्यांवसततुर्धर्षाः पुरींराक्षसपुंगवाः अमरावतींसमासाद्यसेंद्राइवदिवौकसः २६ लंकादुर्गंसमासा
द्यराक्षसैर्बहुभिर्वृताः भविष्यथदुराधर्षाः शत्रूणांशत्रुसूदनाः २७ विश्वकर्मवचःश्रुत्वाततस्तेराक्षसोत्त
माः सहस्रानुचराभूत्वागत्वातामवसन्पुरीं दृढप्राकारपरिखांहैमैर्गृहशतैर्वृतां लंकामवाप्यतेहृष्टाव्य
वसन्रजनीचराः २९ एतस्मिन्नेवकालेतुयथाकामंचराघव नर्मदानामगंधर्वीवभूवरघुनंदन ३० त
स्याःकन्यात्रयंह्यासीन्ह्रीश्रीकीर्तिसमद्युतिः ज्येष्ठक्रमेणसातेषांराक्षसानामराक्षसी ३१

नवारत्नयारतोर्षी २६ २७ सहस्रमनेकेनुचरायेषांतेसहस्रानुचराः २८ २९ ३० अराक्षसीराक्षसजातिभिन्ना ३१

53

श्री
९

व्याधयोपेहिताश्चत्रुपेतिताश्चचिकित्सिता व्याधयश्चकेसर्थः ८ १३ दिशसे दर्दासि अजेयाजेत्समनर्हः प्रभविष्णुः यमर्थः प्रभवश्चतिय... परस्परमनुव्रता
तास्तनुरक्षाश्चप्रभवामेत्यनुकर्षः १४ ब्रह्मलोकाय तं प्राप्तं ब्राह्मणवत्सलः तेषां स्वसुरजत्वात्पुत्रत्वात्तस्ते ... वात्सल्यं १५ १६ अथ ते माल्यवदादयः

त्रयः सकेशस्य सतां स्वेता मिसम तेजसः विहृदिगमनं स्तत्र व्याधयोपेतिताश्च ८ वरप्राप्तिं पितृके
तत्तानैश्चर्यतपोबलात् तपस्स मर्गताम्रेहं भ्रातरः कृतनिश्चयः ९ प्रगृह्य नियमान्घोरान्घोरात्स मान्
पसत्तम विवेहृस्तेनतपोघोरं सर्वभूतभयावहं सत्यार्जवशमोपेतैस्तपोभिर्भुविदुर्लभैः संतापयंतस्ते
लोकान्सदेवासुरमानुषान् ११ ततो विभुस्तत्र वक्त्रो विमानवरमास्थितः सदेशपुत्रानासंस्थवरदोस्मीति
भाषत १२ ब्रह्माणं वरदं ज्ञात्वा संदेवगणैर्वृतं ऊचुः प्रांजलयः सर्वे वेपमानाश्च वडुमाः तपसा तापि
तो देव यदि नो दिशसे वरं अजेयाः शत्रुहंतारस्तथैव चिरजीविनः १४ प्रभविष्णो भवामेति परस्परम
नुव्रताः एवं भविष्यते त्स्मा सकेशतनयान्विभुः १५ सययौ ब्रह्मलोकाय ब्रह्मा ब्राह्मणवत्सलः १६
वरं लब्धा तु ते सर्वे रामराविंचराश्चदा सुरासुरान्सवाधंते वरदानस्य निर्भयाः १७ तैर्वध्यमानास्त्रिदशाः
सर्षिसंघाः सचारणाः त्रातारं नाधिगच्छंति निरयस्था मथा नराः १८ अथ ते विश्वकर्माणं शिल्पिनां व

अव्ययं चिरजीविनं १९ ओजस्तेजस्ते जो बलधतामतपव महतस्वेनांभवानेवास्मतेजसां आत्मसामर्थ्येन रहेकर्ता ... मस्माकमपि ... दो ... कवितिं

सद्योपलब्धिर्विविधाः संधिः ३१ सुकेशस्यनुवादा। सकलममसवो धर्मनामाकाशगं ३२ इ। रा। उ। चतुर्थः सर्गः। ५ देवलब्धलब्ध
न २२ वरदानेन न हतमैश्वर्यं यसतेः ३ ४ अंजनाद्भिनिष्क्रांत अंजनाद्रिगजोत्तमाभिनिष्क्रांतउत्पन्नो जनयामास तन्नाद्दर्शीन पुत्रान जान

रा० उ० ८

सद्योपलब्धिर्गर्भस्य प्रसूतिः सद्य एव च सद्य एव वयः प्राप्तिर्मातुरेव वयः समं ३१ ततः सुकेशो
वरदानगर्वितः श्रियं प्रभोः प्राप्य हरस्य पार्श्वतः चचार सर्वत्र महान्महामतिः खगं पुरं प्राप्य पुरंदरो
यथा ३२ इति रा० उ० चतुर्थः सर्गः ४ सुकेशं धार्मिकं दृष्ट्वा वरलब्धं च राक्षसं ग्रामणीर्नाम गन्धर्वो
विश्वावसुसमप्रभः १ तस्य देववती नाम द्वितीया श्रीरिवात्मजा त्रिषु लोकेषु विख्याता रूपयौवन
शालिनी २ तां सुकेशाय धर्मात्मा ददौ रक्षःश्रियं यथा वरदानकृतैश्वर्यं सा तं प्राप्य पतिं प्रिय ३ आ
सीद्देववती तुष्टा धनं प्राप्येव निर्धनः स तया सह संयुक्तो रराज रजनीचरः ४ अंजनादभिनिष्क्रांतः
करेण्वेव महागजः ततः काले सुकेशस्तु जनयामास राघव। त्रीन्पुत्रान्जनयामास त्रेताग्निसमविग्र
हान् माल्यवन्तं सुमालिं च मालिं च बलिनां वरं त्रीं स्त्रिनेत्रसमान्पुत्रान् राक्षसान् राक्षसाधिपः ६ त्रयो लो
का इवाव्यग्राः स्थितास्त्रय इवाग्नयः त्रयो मंत्रा इवात्युग्रास्त्रयो घोरा इवामयाः ७ यामासीतितस्त्रान्सितिणागंतरंतात्रसि
द्धान्तत्यागुणान्तेस्वर्थः ५ ६ मंत्राश्च वेदत्साह प्रभु मंत्रशक्तिमयाश्च मंताः निवेराश्च आमयत्रदेवातपित्तश्लेष्मरूपं अत्रोपमा चतेषु स्थैर्यं रत्नतेज

सिंह रुचिरमितममभ्यहिंसकं तालिसमाय औं ८

२१ २२ घनगर्भसमप्रभं जलागर्भमिव समकालिं प्रसूता प्रसूतवती अग्निजगर्भं अग्निविसृष्टं स्माद्धेश्वरं गर्भमित्यर्थः विद्युत्केश[...]र्थिनी विद्यु-
त्केशेन सह रतं क्रीडां समर्थपतिता दर्शी बभूवेति शेषः २४ ततः आत्मनः सकाशाज्जातं सुतं विसृज्य पतिना रेमे २५ २६ २७ कारुण्यभावात्का

अवश्यमेव दातव्या परस्मै सेति संध्यया चिंतयित्वा सुता दत्ता विद्युत्केशाय राघवः २१ संध्याया
स्तनयां लब्ध्वा विद्युत्केशो निशाचरः रंतुं तया सार्धं पौलोम्या मघवानिव २२ केनचित्त्वथका
लेन राम सालकटंकटा विद्युत्केशात् गर्भमाप घनराजिरिवार्णवात् ततः सा राक्षसी गर्भं विद्युत्के
शरतार्थिनी रेमे तु सार्धं पतिना विसृज्य सुतमात्मजं उत्सृष्टस्तु तदा गर्भो घनशब्दसमस्वनः २५
नयोत्सृष्टः स तु शिशुः शरदर्कसमद्युतिः निधायास्ये स्वयं मुष्टिं रुरोद शनकैस्तदा २६ ततो वृषभमा
स्थाय पार्वत्या सहितः शिवः वायुमार्गेण गच्छन्वै शुश्राव रुदितस्वनं २७ अपश्यदुमया सार्धं रुदं
तं राक्षसात्मजं कारुण्यभावात्पार्वत्या भवस्त्रिपुरसूदनः २८ तं राक्षसात्मजं चक्रे मातुरेव वयः
समं अमरं चैव तं कृत्वा महादेवोऽक्षयोऽव्ययः पुरमाकाशगं प्रादात्पार्वत्याः प्रियकाम्यया उमया
पि वरो दत्तो राक्षसानां नृपात्मज ३:

[...]वयः समं मातृवयस्कमित्यर्थः २९ तदाह पार्व[...]ः प्रियकाम्ययेति ३: [...]त्कं भवता
रुणपूर्णो भावः स्थितं तस्याः पार्वत्या प्रेरित इति शेषः २८ मा[...]

एवं कः कुत्रस्थः तद्दर्शनाश्चर्यात्तस्य किमपराधं प्राप्य विष्णुना द्राविताः कथं च द्राविताः ६ आसीन्नरत्नः कथनेन महत्कुतूहलमिदं तद्दूरं भानुर्य

यातमोनुदतीति तथानुद ७ संकारालंकृतं पदवाक्यार्थसंस्कारयुतं विस्मयमानः सर्वज्ञोप्यवक्ताटयतीति विस्मयः ८ अपः सृष्ट्वा भूमेरधोभागवर्तिनीरपः

सृष्ट्वेत्यर्थः तत्र सलिलसंभवः प्राजापतिरभूदित्यन्वयः अत एव सर्गादौ तासु वीर्यमवासृजत् तदंडमभवद्धैमं सहस्रांशुसमप्रभं तस्मिन्जज्ञे स्वयं ब्र

ह्मा सर्वलोकपितामह इति मनूक्तेः आपो वा इदमग्र आसन् स प्रजापतिः पुष्करपर्णे समभवत् तथा आपो वा इदमग्रे सलिलमासीत्तस्मिन्प्रजापतिर्वा

कस्यांश्च वै कौशल्यं किंनाम च बलोत्कटः अपराधं च किं प्राप्य विष्णुना द्राविताः कथं ६ ए

तद्विस्तरतः सर्वं कथयस्व ममानघ कौतूहलमिदं मह्यं नुद भानुर्यथा तमः ७ राघवस्य वचः

श्रुत्वा संस्कारालंकृतं शुभं अथ विस्मयमानस्तु मगस्त्यः प्राह राघवं ८ प्रजापतिः पुरा सृष्ट्वा

अपः सलिलसंभवः तासां गोपायने सत्वानसृजत्पद्मसंभवः ९ ते सत्वाः सत्वकर्तारं विनीत

वदुपस्थिताः किं कुर्म इति भाषंतः क्षुत्पिपासाभयार्दिताः १० प्रजापतिस्तु तान्सर्वान्प्रत्याह

प्रहसन्निव आभाष्य वाचा यत्नेन रक्षध्वमिति मानवाः ११ रक्षाम इति तत्रान्यैर्यक्षाम इति चापरैः १२

पूर्वं तावत्तत्समामपश्यत्तं वराहो भूत्वाहरदिति श्रुतेश्च तदेव पद्मगर्भमवरुह्य तेन दर्शितं तासां स्वसृष्टानामपां गोपायने रक्षणनिमित्तं सत्वान्भूतानि १०

भृतान्यसृजत्पितरि विनीतः सन् तः क्षुत्पिपासाजनितभयेनार्दिताः ९ प्रहसन्निव रक्षंभयद्विष्णुना स्वप्रजाविषयकदयावशात्

नि .... र्थः ॥ विनीतवत्पितरि विनीताः संतः क्षुत्पिपासा ... वाचा ... तानीति वाचा आभाष्य संबोध्य यत्नेनेमा आपो रक्षध्वमिति तानि सत्वानाह ११

हासा मानवा इत्यनेन तेषां नु अपवृत्त्य नुग्रहः सूचितः वाचा ... णेन

... पक्षं भवती

तत्र तेषु भग... तेषु मध्ये भगवत्... ता २ ... इति शेषः
रक्षामो गोप्तारः तथा यक्षाम इति प्रतिवचनं ... नाविनाशेन ... इति केचन प्राहुः ... इति
हितार्थं इति इत्यर्थः ... भुक्षिताः पिपासिताः १२ ... १३ तत्र ... भेदः

भुक्षिताभुक्षितैरुक्तस्ततस्तानाह भूतकृत् १२ रक्षाम इति यैरुक्तं राक्षसास्ते भवन्तु वः यक्षाम इति यै
रुक्तं यक्षा एव भवन्तु वः १३ तत्र हेतिः प्रहेतिश्च भ्रातरौ राक्षसाधिपौ मधुकैटभसंकाशौ बभूवतुररिंद
मौ १४ प्रहेतिर्धार्मिकस्तत्र तपोवनगतस्तदा हेतिर्दारक्रियार्थं तु परं यत्नमथाकरोत् १५ स कालभगि
नीं कन्यां भयां नाम महाभयां उदावहदमेयात्मा स्वयमेव महामतिः १६ स तस्यां जनयामास हेतिराक्षसपुं
गवः पुत्रं पुत्रवतां श्रेष्ठो विद्युत्केशमिति श्रुतं १७ विद्युत्केशो हेतिपुत्रः सदीप्तार्कसमप्रभः व्यवर्धत म
हातेजास्तोयमध्य इवाम्बुजं १८ स यदा यौवनं भद्रमनुप्राप्तो निशाचरः ततो दारक्रियां तस्य कर्तुं व्यव
सितः पिता १९ संध्यादुहितरं सोऽथ संध्यातुल्यां प्रभावतः वरयामास पुत्रार्थं हेतिराक्षसपुंगवः २०

धर्ममधुकैटभावसुरौ १४ तपोवनगतः विरक्तः सन्निति शेषः १५ परं यत्नमेव दर्शयति स इति कालो वैवस्वतः स्वयमेव तिगत्वा प्रार्थनां कृत्वे
तिशेषः १६ १७ प्रभावतः संध्यातुल्यामिति संबंधः संध्यादुहिता सालेकटंकटाख्या यं चरता प्रा पाठेन भगवत्स्पष्टत्वाद् ... २०

ॐ
८

निवासनं निवासमित्यर्थः २२ २६ यंत्रशस्त्रैः शस्त्रैः समावृता २७ ३१ निवासयामास निवासमकरोदित्यर्थः ३२ प्रमुदितैर्नैऋतानां सहस्रैः ... वेष्टिता

भगवंल्लब्धवानस्मि वरमिष्टं पितामहात् निवासनं न मे देवो विदधे स प्रजापतिः तं यतस्व भगवन्किं
चिन्निवासं साधय मे प्रभो २३ न च पीडा भवेद्यत्र प्राणिनो यस्य कस्यचित् एवमुक्तस्तु पुत्रेण विश्रवा मु
निपुंगवः २४ वचनं प्राह धर्मज्ञः श्रूयतामिति सत्तम २४ दक्षिणस्योदधेस्तीरे त्रिकूटो नाम पर्वतः २५
लंका नाम पुरी रम्या निर्मिता विश्वकर्मणा राक्षसानां निवासार्थं यथेंद्रस्यामरावती तत्र त्वं वस भद्रं ते
लंकायां नात्र संशयः हेमप्राकारपरिखा यंत्रशस्त्रसमावृता २७ रमणीया पुरी सा हि रुक्मवैडूर्यतो
रणा राक्षसैः सा परित्यक्ता पुरा विष्णुभयार्दितैः २८ शून्या रक्षोगणैः सर्वै रसातलतलं गतैः शून्या
सा प्रति लंका सा प्रभुस्तस्यां न विद्यते स त्वं तत्र निवासाय गच्छ पुत्र यथासुखं निर्दोषस्तत्र ते वासो न
बाधस्तत्र कस्यचित् ३० एतच्छ्रुत्वा स धर्मात्मा धर्मिष्ठं वचनं पितुः निवासयामास तदा लंका पर्वतमूर्ध
नि नैऋतानां सहस्रैस्तु हृष्टैः प्रमुदितैः सदा अचिरेणैव कालेन संपूर्णा तस्य शासनात् ३२ स तत्र
न्यवसत्प्रीतो धर्मात्मा नैऋतर्षभः समुद्रपरिखायां स लंकायां विश्रवात्मजः ३३ काले काले तु धर्मा

...मेति संबंधः ... स्वर्णवैडूर्य ... २५ ३४ अपारे ... विभूषित ... ३५

... मुक्तं भवति

२५ इति श्री रा० उ० तृतीयः सर्गः ३ लंकायामेवमपि र[illegible] [illegible] श्रुत्वा विस्मितेन रामेणागस्त्यो मुनिरादि प्रश्ने [illegible] ननन्तरपादनं [illegible] यमा
रा० कथमासीदिति विस्मयमागतः १ ततो विस्मयप्राप्त्यनन्तरं मुहुः स्मयमानो विस्मयं कुर्वन् २ तदेवाह भगवन्निति एवमपि पिशि
उ०

भगस्तिमिः सूर्य इवावभासयन्स्थितः समीपे प्रवयोस्य वितपः २५ इत्यार्षे रा० उ० तृतीयः स
र्गः ३ श्रुत्वागस्त्येरितं वाक्यं रामो विस्मयमागतः कथमासीत्तु लंकायां संभवो रक्षसां पु
रा १ ततः शिरः कंपयित्वा त्रेताग्निसमविग्रहं तमगस्त्यं मुहुर्दृष्ट्वा स्मयमानोऽभ्यभाषत २
भगवन्पूर्वमप्येवा लंकासीत्पिशिताशिनां श्रुत्वेदं भगवद्वाक्यं जातो मे विस्मयः परः ३ पुल
स्त्यवंशादुद्भूता राक्षसा इति नः श्रुतं इदानीमन्यतश्चापि संभवः कीर्तितस्त्वया ४ रावणा
त्कुंभकर्णाच्च प्रहस्ताद्विकटादपि रावणस्य च पुत्रेभ्यः किन्नु ते बलवत्तराः ५

वणयोः एवमपि लंका पिशिताशिनामावास आसीदिति भगवद्वाक्यमन्यतोपि रक्षः संभवपरं श्रुत्वा मे विस्मयो जातः ३ तदेवाह पुलस्त्ये
ति नोस्माकं अन्यतश्चापि संभवः कीर्तितः लंका राक्षसानां निवासार्थं निर्मितेति ब्रुवो वाक्यानुवादेनेत्यर्थः ४ राक्षसप्रचारं दर्शयति का
पादयः तेभ्यो बलवत्तराः किन्नु परो विस्मयात् तद्विज्ञापयति इति तमिति ५

तस्यां भार्यायां ५ सर्वैर्ब्रह्मगुणैः शम[illegible]दःशौचादिगुणैर्युक्तमपत्यं जनयामास पितामहः वैश्रवणपितामहः पुलस्त्यः तुष्टः [illegible]
कपेमर्थमितिकतकस्वरसः प्रजामन्विच्छति प्रजान्वेषिकातत्सुणागुणपर्यालोचिकान्योतिशास्त्रविषया बुद्धिर्यस्यास्य वैश्रवणस्य श्रेयोविचिंत
यस्मात्स्यस्तस्मिन्विश्रवसः पुत्रेजातेतु हृष्टो बभूवेतिनव्याख्यानात् ६ श्रेयस्करीं यनेशुत्वरूप। श्रेयः शास्त्रिदेत्तुभूतांतयोविषयांतस्यबुद्धिं दृष्ट्वा जन्म

मुहातपस्समयायुक्तोविश्रवानाममुनिपुंगवः सतस्यांवीर्यसंपन्नमपत्यंपरमाद्भुतं जनयामासधर्म
ज्ञः सर्वैर्ब्रह्मगुणैर्वृतं तस्मिन्जातेतुसंहृष्टः संबभूवपितामहः ६ दृष्ट्वाश्रेयस्करींबुद्धिंधना
ध्यक्षोभविष्यति नामचास्याकरोत्प्रीतः सार्धंदेवर्षिभिस्तदा ७ अवर्धताहुतिहुतोमहातेजायथा
नलः तस्माद्वैश्रवणोनामभविष्यत्येषविश्रुतः ८ सतुवैश्रवणस्तत्रतपोवनगतस्तदा अवर्धता
हुतिहुतोमहातेजायथानिलः ९ तस्याश्रमपदस्थस्यबुद्धिर्जज्ञेमहात्मनः चरिष्येपरमंधर्मंधर्मो
हिपरमागतिः १० सतुवर्षसहस्राणितपस्तप्त्वामहावने यंत्रितोनियमैरुग्रैश्चकारसुमहत्तपः ११

लंनैपर्यालोचनयेतिशेषः धनाध्यक्षोभविष्यतिकालांतरे एवंनामाभविष्यतिइतिसंहृष्टो बभूवेतिअन्वयः ७ यतोविश्रवसोऽपत्यं रूपसादृश्या
[illegible]वैश्रवणइतिश्रुतः श्रामेसहोभविष्यतिनः अन्वयप्रतिसंनिर्देशः विश्रवसोविश्रवणः शः ८ ९ १०
[illegible]तोचनियमैर्यंत्रितः संजातनियमः स्वयं ११

[illegible] तपःसपार्ये [illegible] कल्पाः [illegible] गात
[illegible] मुक्तंभवती
[illegible]

ततविशिं वत्स्यासाजलाशितादिविधिकित्यर्थः १२ [illegible] भगवत्प्रसादवैश्रवणाह अथ प्रीतिरिति १४ [illegible] लोकपालत्वं वित्तरक्षणं [illegible] राजान

[illegible] १६ चतुर्थं चतुर्थीएतरां १७ यमादेशयम्यतस्लोकपालपदं [illegible] शतं वायुरहि [illegible] सतितं

रोणिवर्षसहस्राणि तैर्विधिमकल्पयत् जलाशी मारुताहारो निराहारस्तथैव च एवं वर्षसहस्रा
णि जग्मुस्तान्येकवर्षवत् १२ अथ प्रीतो महातेजाः सेन्द्रैः सुरगणैः सह गत्वा तस्याश्रमपदं ब्रह्मेदं
वाक्यमब्रवीत् १३ परितुष्टोऽस्मि ते वत्स कर्मणानेन सुव्रत वरं वृणीष्व भद्रं ते वरार्हस्त्वं महामतिः
अथाब्रवीद्वैश्रवणः पितामहमुपस्थितं भगवल्लोकपालत्वमिच्छेयं वित्तरक्षणं १५ अथाब्रवीद्वै
श्रवणं परितुष्टेन चेतसा ब्रह्मा सुरगणैः सार्द्धं बाढमित्येव हृष्टवत् १७ अहं वै लोकपालानां चतुर्थं
स्रष्टुमुद्यतः यमेन्द्रवरुणानां च चतुर्थस्त्वं भविष्यसि १८ एतच्च पुष्पकं नाम विमानं सूर्यसन्निभं प्र
तिगृह्णीष्व यानार्थं त्रिदशैः समतां व्रज १९ स्वस्ति तेऽस्तु गमिष्यामः सर्व एव यथागतं कृतकृत्या वयं
तात दत्त्वा तव वरद्वयं २० इत्युक्त्वा स गतो ब्रह्मा स्वस्थानं त्रिदशैः सह गतेषु ब्रह्मपूर्वेषु देवेष्वथ नभस्त
ले २१ धनेशः पितरं प्राह प्राञ्जलिः प्रयतात्मवान् ॥

शक्रादीनां चतुर्थो भविष्यसि इति संबंधः १८ त्रिदशैः समतां व्रज नतु विपश्यतेनैव तिष्ठेत्यर्थः १९ वरद्वयं निधीशत्वपुष्पके [illegible] २१

...अथरावणस्यब्रह्मानुगृहजन्यवलवैभ...

अथरावणोत्पत्तिशेषतयातद्रक्षस्यपौलस्त्यस्योत्पत्तिमाहतस्यतद्वचनमिति १ तस्यतेजआद्यहि शृणुतथाहृतेनकथां ब्रवीमितांशृणुराम [illegible] सर्वस्येनदा
रणेनशत्रून्जघानसचशत्रुभिर्नवध्यः तत्कारणंशृणु २ तावत्प्रथमंरावणकुलादिब्रवीमिपश्चाद्रावणोत्पत्तिमितिशेषः तावत्तेरावणस्येतिपादः ३
तत्कुलमाहपुरेति पुलस्त्योदशप्रजापतिष्वेकः पितामहइव तयोर्हि भवजनिग्रहानुग्रहसामर्थ्यादितिभावः ४ तदेवाह नानुकीर्त्य इतिविचित्रवर्ण

तस्यतद्वचनंश्रुत्वाराघवस्यमहात्मनः कुंभयोनिर्महातेजावाक्यमेतदुवाचह १ शृणुरामत
थावृत्तंतस्यतेजोबलंमहत् जघानशत्रून्येनासौनचवध्यःसशत्रुभिः तावत्तेरावणस्येदंकुलं
जन्मचराघव वरप्रदानंचतथातस्मैदत्तंब्रवीमिते २ पुराकृतयुगेरामप्रजापतिसुतःप्रभुः
पुलस्त्योनामब्रह्मर्षिःसाक्षादिवपितामहः ३ नानुकीर्त्यागुणास्तस्यधर्मतःशीलतस्तथा
प्रजापतेःपुत्रइतिवक्तुंशक्यंहिनामतः ४ प्रजापतिसुतत्वेनदेवानांवल्लभोहिसः इष्टःसर्वस्य
लोकस्यगुणैःशुभ्रैर्महामतिः ५ सतुधर्मप्रसंगेनमेरोःपार्श्वेमहागिरेः तृणविन्द्वाश्रमंग
त्वान्यवसन्मुनिपुंगवः ६

विचित्र[illegible]वादित्यर्थः धर्मतः शीलत [illegible] श्रोत्पन्नोगुणाइत्यन्वयः अर्थप्रकारां [illegible]णत
इत्येवंचेत्पर्यंतिप्रजापतेः पुत्रइतिनामपदेन [illegible] कीर्तनप्रवृत्तगुणादिकंवक्तुं [illegible] पतिपुत्रत्वोत्त्यात [illegible] कल्याणगुणवत्त्वमुक्तंभवती
[illegible] ५ धर्मसंग्रहेनतपःसंपादे [illegible] छया ७

विघ्नं चक्रुरिति तपसा विघ्नकारिणे न तु वृद्धिः ... देवाः सर्वर्त्तुषिति ... मायमदे ... वादयन्तो वीणादिकमिति ... स्त्रो समयन्तः
...न्तः १२ ३ ... दिति ... १४ १५ स्वाध्यायं वेदाध्ययनं ... वेदश्रुतिं वेदध्वनिं ... तपसो निधिं ... च

तपस्तेपे स च धर्मात्मा स्वाध्यायनियतेन्द्रियः गत्वाश्रमपदं तस्य विघ्नं कुर्वन्ति कन्यकाः ८ ऋषिपन्नग
कन्याश्च राजर्षितनयाः क्रीडन्त्योप्सरसश्चैव तं देशमुपपेदिरे ९ सर्वर्त्तुफलभोगपत्राढ्यमत्यन्तका
ननं च नित्यं रम्यत्वात्तं देशं गत्वा क्रीडन्ति कन्यकाः १० देवाप्सरसमाणीयत्वात्तस्य ... ब्रह्मर्षि
जः गायन्तो वादयन्तश्च लासयन्तस्तथैव च ११ मुनेस्तपस्विनस्तस्य विघ्नं चक्रुरनिन्दिताः अथ
रुष्टो महातेजा व्याजहार महामुनिः १२ या मे दर्शनमागच्छेत्सा गर्भं धारयिष्यति तास्तु सर्वाः श्रु
तिं श्रुत्वा तस्य वाक्यं महात्मनः १३ ब्रह्मशापभयाद्भीतास्तं देशं नोपचक्रमुः तृणविन्दोस्तु राज
र्षेस्तनया न शृणोति तत् गत्वाश्रमपदं तत्र विचचार सुनिर्भया नचापश्यच्च सा तत्र काञ्चित्स्वां
गतां सखीं तस्मिन्काले महातेजाः प्राजापत्यो महानृषिः स्वाध्यायमकरोत्तत्र तपसा भावितः स्वयं
१५ सा तु वेदश्रुतिं श्रुत्वा दृष्ट्वा चैव तपोनिधिं अभवत्पाण्डुदेहा सा सुव्यञ्जितशरीरजा १६ बभूव

पाण्डुदेहा गर्भोत्पत्त्या सुव्यञ्जितशरीरजा शरीरायतत इति शरीरजो गर्भः सुप्रकाशितो यस्याः सा १७ तद्दोषं गर्भसंभवरूपत्वं ... भूव १८

वसकुडिगाट ... ब्रह्मभास्तां इदं किंचिदि
किंचिदितोश्रूयमित्तीतेषर्ष्ये: १८

65

ऋषरहशंकन्यासमाप्तुकं १९ २० पूर्वगत प्रथमंगता २१ २२ तत्रापिगर्भकारणमित्यर्थः २३ तनयांगृहीत्वापुलहस्यगता २४ … प्रि…
मितात्वेनस्वीकृत्येत्यब्रवीत तन्तूर्धरेतसोसमतानयाप्रयोजनं तत्राह सयमुद्यतामिति उद्यतामाह,तांमितांपुरस्तादप्रवेदितं भोज्यांमेनेप्रज्ञाना

तांतदृष्ट्वातथाभूतांतत्राविंदुरथाब्रवीत किंत्वमेतन्महद्र्शं धारयस्यात्मनोवपुः १९ सातकृ
त्वांजलिंदीनाकन्योवाचतपोधनं नजानेकारणंतातयेनमेरूपमीदृशं २० किंत्वर्ह्वंगतास्म्य
कामहर्षेर्भावितात्मनः पुलस्त्यस्याश्रमंदिव्यमन्वेष्टुंस्वसखीजनं २१ नचपश्याम्यहंतत्रकांचि
दभ्यागतांसखीं रूपस्यतुविपर्यासंस्मदृष्ट्वाताश्रमिहागता २२ तृणबिंदुस्तुराजर्षिस्तपसाद्योतिता
प्रभः ध्यानंविवेशतत्रापिअपश्यदृषिकर्मजं सतुविज्ञायतंशापंमहर्षेर्भावितात्मनः गृहीत्वा
तनयांगत्वापुलस्त्यमिदमब्रवीत २४ भगवंस्तनयामेत्वंगुणैःस्वैरेवभूषितां भिक्षांप्रतिगृहाण
मांमहर्षेस्वयमुद्यतां तपश्चरणयुक्तस्यश्राम्यमाणेंद्रियस्यते शुश्रूषणपरानित्यंभविष्यतिनसं
शयः २५ तंब्रुवाणंतुतद्वाक्यंराजर्षिंधार्मिकंतदा जिघृक्षुरब्रवीत्कन्यांबाढमित्येवसद्द्विजः २२
दत्त्वातुतनयांराजास्वमाश्रमपदंगतः सापितत्रावसत्कन्यातोषयंतीपतिं…गुणैः २८

योऽपिदृष्ट्वातकमाराक्षेत्रस्य सयमुद्यतेर्ययास्वितस्यर्थः … तीतिग्रहफलम शुश्रूषणपरो… २८ जित… ययात्नायांपाणिग्रहण… मिति
तामरु… दी… …
… ३ तिः … … … वि

सिं॰ भि॰ तंसत्यवंशकीर्तिनि सि॰ः ९८

...मयो मतः पितृसमर्थः ... यतः अर्थीः [illegible] दे विश्रुतो गम तोवतिशेषः २१ ३३ इत्यार्षे रामा॰ उ॰ तृतीयः सर्गः [illegible] पौलस्त्य

वा॰ [illegible]स्य ते शीलवृत्ताभ्यां तुतोष मुनिपुंगवः प्रीतः स तु महातेजा वाक्यमे[illegible] २९ परितुष्टोऽस्मि

[illegible] गुणानां संपदा भृशं तस्माद्देवि ददाम्यद्य पुत्रमात्मसमं तव ३० उभयोर्वंशकर्तारं पौलस्त्य

ति विश्रुतं यस्मात्तु विश्रुतो वेदस्त्वयेहाध्ययतो मम तस्मात्स विश्रवा नाम भविष्यति न संशयः ३१

एवमुक्ता तु सा देवी प्रहृष्टेनांतरात्मना अचिरेणैव कालेन सूता विश्रवसं सुतं त्रिषु लोकेषु विख्या

तं यशोधर्मसमन्वितं ३२ श्रुतिमान्समदर्शी च व्रताचाररतस्तथा पितेव तपसा युक्तो ह्यभवद्वि

श्रवा मुनिः ३३ इत्यार्षे रामा॰ उ॰ कांडे द्वितीयः सर्गः २ अथ पुत्रः पुलस्त्यस्य विश्रवा मुनिपुंगवः

अचिरेणैव कालेन पितेव तपसि स्थितः १ सत्यवान्शीलवान्दांतः स्वाध्यायनिरतः शुचिः स

र्वभोगेष्वसंसक्तो नित्यं धर्मपरायणः २ ज्ञात्वा तस्य तु तद्वृत्तं भरद्वाजो महामुनिः ददौ विश्रवसे

भार्यां स्वसुतां देववर्णिनीं ३ प्रतिगृह्य तु धर्मेण भरद्वाजसुतां तदा प्रजान्वीक्षिकया बुद्ध्या श्रेयो ह्यस्य

विचिंतयन् ४

द्विश्रवसः कुबेरोत्पत्तिः १ २ तस्य तद्वृत्तं विश्रवसस्तादृशं चरित्रमित्यर्थः देववर्णिनीं देवसमीनरूपां त

न्मींच ३ प्रजान्वीक्षिकया प्रजानां शुभाशुभवीक्षणरूपया बुद्ध्या ज्योतिःशास्त्रसिद्धया उत्पत्स्यमानपुत्रस्य श्रेयो गुणं चिंतयन्

66

२१ यस्यप्रमाणात्त्वाकारप्रमाणात् २२ २४ द्वंद्वयुद्धं रावणेनवधेनततभारस्तिरोहितः रावणिवधपर्वतद्वंद्वयुद्धः संख्येतस्येति ...तस्य रावणस्य
त्कृतः पराभवआक्रमणमितियन्नन्नकिंचिदपितद्दिष्ट्यातिरोधानस्यचनयांगभंगेनद्वंद्वयुद्धमनुप्राप्तो अतएवद्दृतो रावणिरितियद्दिदमेवबहिंति

दिष्ट्या प्रहस्तो विकटो विरूपाक्षो महोदरः अकंपनश्च दुर्धर्षो निहतास्ते निशाचराः २१ यस्य प्रमा
णाद्विपुलं प्रमाणं नेह विद्यते दिष्ट्या ते समरे राम कुंभकर्णो निपातितः २२ त्रिशिराश्चातिका
यश्च देवांतकनरांतकौ दिष्ट्या ते निहता राम महावीर्या निशाचराः २३ दिष्ट्या त्वं रावणेनेह द्वंद्वयुद्ध
मुपागतः देवतानामवध्येन विजयं प्राप्तवानसि २४ संख्ये तस्य न किंचित्तु रावणस्य पराभवः द्वंद्व
युद्धमनुप्राप्तो दिष्ट्या ते रावणिर्हतः २५ दिष्ट्या तस्य महाबाहो कालस्येवाभिधावतः मुक्तः सुरारि
पो वीर प्राप्तश्च विजयस्त्वया २६ अभिनंदामहे सर्वे संश्रुत्येंद्रजितो वधं अवध्यः सर्वभूतानां महामा
याधरो युधि २७ विस्मयस्त्वेष चास्माकं तच्छ्रुत्वेंद्रजितं हतं दत्वा पुण्यामिमां वीर सौम्यामभयदक्षि
णां दिष्ट्या वर्द्धसि काकुत्स्थ जयेनामित्रकर्षण २८

शेषः २५ ... त्वमपि ... :गावंधादिकृतणमकृच्छ्रः दिति ... २६ विस्मयहेतुमवध्यइतियतःसोवध्यत्वादिगुणोन्नाशचचपुरुषं
इंद्रजितोस्माकंविस्मय ... वपतुष्टयइतिवा २७ अभयदक्षिणाम् अभयदानं दत्वा ऋषिभ्यः इति ... शेषः २८

विस्मयं ... प्रतिहाह ... रतिसंबोध   २२ कीदृशो ... यतोऽधिकाभिः ... रति ...

... वनं तेषु तन्मुखेन रामभाविताात्मनां विस्मयं परमं गत्वा रामः प्रांजलिरब्रवीत् १९ भग
वंतः कुंभकर्णो रावणश्चानिशाचरं अतिक्रम्य महावीर्यौ किं प्रशंसथ रावणिं २० महोदरं प्र
हस्तं च विरूपाक्षं च राक्षसं मत्तोन्मत्तौ च दुर्धर्षौ देवांतकनरांतकौ अतिक्रम्य महावीरान् किं प्र
शंसथ रावणिं २१ अतिकायं त्रिशिरसं धूम्राक्षं च निशाचरं अतिक्रम्य महावीर्यान् किं प्रशंस
थ रावणिं २२ कीदृशो वै प्रभावोस्य किं बलं कः पराक्रमः केन वा कारणेनैष रावणादतिरिच्यते
२३ शक्यं यदि मया श्रोतुं न खल्वाज्ञापयामि वः यदि गुह्यं न चेद्वक्तुं श्रोतुमिच्छामि कथ्यतां २४
शक्रोपि विजितस्तेन कथं लब्धवरश्च सः कथं च बलवान् पुत्रो न पिता तस्य रावणः २५ कथं पितुश्चा
प्यधिको महाहवे शक्रस्य जेता हि कथं स राक्षसः वराश्च लब्धाः कथयस्व मेद्य पप्रच्छतश्चास्य मु
नीन्द्र सर्वं २६ इत्यार्षे रा॰उ॰ प्रथमः सर्गः १

भावं बलं शारीरं २३ शक्यमिति यदि गुह्यं न भवति यदि वक्ष्यामि वक्तुं शक्यं तदाहं श्रोतुमिच्छामि केवलेन खलु वक्तुमाज्ञापयामि २४ पि
ता रावणो न बलवान् अपेतपेति च कथं २५ २६ इति रा॰उ॰ प्रथमः सर्गः १

प्रतिहारः द्वास्थः तदर्थं तन्मुखेन रामाय स्वागमनं निवेदयितुं तेनार्थं विष्ठिता द्वारि स्थिता इत्यर्थः ७ अवस्याता तं तं रसं सर्वं अनुमत्य [illegible] हास्याग [illegible] दाचः ८

संप्राप्यैते महात्मानो राघवस्य निवेशनं विशिष्टिताः प्रतिहारार्थं हुताशनसमप्रभाः ७ वेद
वेदांगविदुषो नानाशास्त्रविशारदाः द्वास्थं प्रोवाच धर्मात्मा अगस्त्यो मुनिसत्तमः ८ निवे
द्यतां दाशरथेर्ऋषयो वयमागताः प्रतिहारस्ततस्तूर्णमगस्त्यवचनाद्द्रुत ९ समीपं राघव
स्याशु प्रविवेश महात्मनः नयेंगितज्ञः सद्वृत्तो दक्षो धैर्यसमन्वितः १० स रामं दृश्य सहसा पू
र्णचन्द्रसमद्युतिः अगस्त्यं कथयामास संप्राप्तमृषिसत्तमं ११ श्रुत्वा प्राप्तान्मुनींस्तांस्तु बालसू
र्यसमप्रभान् प्रत्युवाच ततो द्वास्थं प्रवेशय यथासुखं १२ दृष्ट्वा प्राप्तान्मुनींस्तांस्तु प्रत्युवाच
कृतांजलिः पाद्यार्घ्यादिभिरानर्च गां निवेद्य च सादरं १३ रामोभिवाद्य प्रयत आसनान्यादि
देश ह तेषु कांचनचित्रेषु महत्सु च वरेषु च १४ कुशांतर्धानदत्तेषु मृगचर्मयुतेषु च यथा
र्हमुपविष्टास्ते आसनेष्वृषिपुंगवाः १५

विष्ठिता [illegible] निवेद्यतामिति [illegible] ममिति मानसीत् [illegible] द्रुतमिति का [illegible] कीर्तनाश्रितत्वे [illegible] परीताभावो विवक्षितः [illegible] १२ निवेद्य
आसनमिति [illegible] १३ वरेषु [illegible] १४ कुशांतर्धानदत्तेषु [illegible] कृतं तेषु [illegible] स्तीर्णत्वं तत्र [illegible] इत्यर्थः १५

सपुरोगमाः पुरोगमैः प्रधानैः सहि ... १६ हतशात्रवं हतशत्रुम् ... त्वां भा ... [illegible] ... वक्तारस्तेन कुशलमेव ... चर्हा
मेनैव लोकैकुशलमित्यर्थः १७ दिष्ट्या त्वया हतस्तत्क्षणे न ... आयोऽः पुत्रवानात ... भारः तद्वधस्त्वैव चक्र ... त्यर्थः त

वा॰
उ॰
२

रामेण कुशलं पृष्टाः सशिष्याः सपुरोगमाः महर्षयो विदितोरामं वचनमब्रुवन्
कुशलं नो महाबाहो सर्वत्र रघुनंदन १६ त्वां तु दिष्ट्या कुशलिनं पश्यामो हतश
त्रवं दिष्ट्या त्वया हतो राजन् रावणो लोकरावणः १७ न हि भारः स ते राम रावणः पुत्रपौ
त्रवान् सधनुस्त्वं हि लोकांस्त्रीन्विजयेथा न संशयः १८ दिष्ट्या त्वया हतो राम रावणः
पुत्रपौत्रवान् दिष्ट्या विजयिनं त्वाद्य पश्यामः सह सीतया १९ लक्ष्मणेन च धर्मात्मा
भ्रात्रा त्वद्धितकारिणा मातृभिर्भ्रातृसहितं पश्यामो वयमद्य वै २०

देवदर्शयत्निसधनुरिति विजयेथाः विपराभ्यां जिरिति तङ् १८ लक्ष्मणेन चेति अस्यार्थस्य विस्पष्टो दृतमसंहताय इति शेषः मातृभिरि
त्यस्य द्विसंख्यसत्वादिः युक्तमिति शेषः २०

७०

ॐ श्रीगणेशाय नमः ॐ उत्तरे तत्तरं कार्यं कृत्वा गोप्यां निजे पदे स्थापयित्वा ... मोक्षं कुलदैवतं । अथ रावणस्य वधानुष्ठानं वर्णयते
व प्रतिपादनद्वारा तज्जातत्वेन भगवति परत्वं मालि शायं प्रतिपाद्यितव्यं देवभवनं वाप्स ... भगवत्कथा दिव्यानं च लोकत्रयत्रणः ... प्राप्तराज्यस्य रामस्य
प्राप्नेति राक्षसानां वधे कृते अनंतरं प्राप्तराज्याभिषेकस्य समीपे मुनयः आगमन् किमर्थं राघवं प्रतिनंदितुं ... मित्यर्थः १ पूर्वस्यां दिशि ये

वा॰
उ॰

श्रीगणेशाय नमः प्राप्तराज्यस्य रामस्य राक्षसानां वधे कृते आजग्मुर्मुनयः सर्वे राघवं प्रति
नंदितुं १ कौशिकोथ यवक्रीतो गार्ग्यो गालव एव च कण्वो मेधातिथेः पुत्रः पूर्वस्यां दिशि ये
श्रिताः २ स्वस्त्यात्रेयश्च भगवान्नमुचिः प्रमुचिस्तथा अगस्त्योत्रिश्च भगवान्सुमुखो विमुखस्तथा ३
आजग्मुस्ते सहागस्त्या ये श्रिता दक्षिणां दिशं नृषङ्गुः कवषी धौम्यो कौषेयश्च महानृषिः तेप्याज
ग्मुः सशिष्या वै ये श्रिताः पश्चिमां दिशं वसिष्ठः कश्यपोथात्रिर्विश्वामित्रः सगौतमः ५ जमदग्नि
भरद्वाजस्तेपि सप्तर्षयस्तथा उदीच्यां दिशि सप्तैते नित्यमेव निवासिनः ६ श्रिताः पूर्वदिशि प्रधानतया ये

ते पि उक्त वसिष्ठादिरूपाः सप्तर्षयोप्यागता इत्यर्थः तेषां स्वरूपकथनं उदीच्यां दिशि नित्यमेव निवासिनः
स्थिता इत्यर्थः स्वस्तिकरश्चात्रेयः स्वस्त्यात्रेयः ३ ५ उत्तरदिशाः कश्यपादिभिः सहागत इति चेच्छ्रणु यथा गस्त्यस्तेजोमंडलेन तत्र समये नित्यस्थि
रोदितो वसिष्ठो नित्यं समीप एव वर्तते कोनामासौ वसिष्ठो यदुत्तरदिशाः कश्यपादिभिः सहागत इति चेच्छ्रणु यथागस्त्यस्तेजोमंडलेन ... तथा वसिष्ठोपि मंडले सप्तर्षिमध्यमप्यस्ति भूलोके च तत्र सप्तर्षिमंडलस्य लेः सहागत इत्युच्यते वदंति ६
केपियोगवैभवात् भूलोके स्वाश्रमस्थापितया वसिष्ठोपि मंडले


71

७ कांड

उत्तरकांड प्रारंभः

[illegible]

72


73

